श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुस्त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुस्त्रिंशः सर्गः ॥

## वालिना रावणस्य पराभवो रावणस्य तेन सह मैत्रीभावश्च

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः।
चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः॥ **7.34.1** ॥

राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकम्।
रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः॥ **7.34.2** ॥

ततः कदाचित् किष्किन्धां नगरीं वालिपालिताम्।
गत्वाऽऽह्वयति युद्धाय वालिनं हेममालिनम्॥ **7.34.3** ॥

ततस्तु वानरामात्यास्तारस्तारापिता प्रभुः।
उवाच वानरो वाक्यं युद्धप्रेप्सुमुपागतम्॥ **7.34.4** ॥

राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत्।
कोऽन्यः प्रमुखतः स्थातुं तव शक्तः प्लवङ्गमः॥ **7.34.5** ॥

चतुर्भ्योऽपि समुद्रेभ्यः सन्ध्यामन्वास्य रावण।
इदं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम्॥ **7.34.6** ॥

एतानस्थिचयान् पश्य य एते शङ्खपाण्डुराः।
युद्धार्थिनामिमे राजन् वानराधिपतेजसा॥ **7.34.7** ॥

यद्वामृतरसः पीतस्त्वया रावण राक्षस।
तदा वालिनमासाद्य तदन्तं तव जीवितम्॥ **7.34.8** ॥

पश्येदानीं जगच्चित्रमिमं विश्रवसः सुत।
इदं मुहूर्तं तिष्ठस्व दुर्लभं ते भविष्यति॥ **7.34.9** ॥

अथवा त्वरसे मर्तुं गच्छ दक्षिणसागरम्।
वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव पावकम्॥ **7.34.10** ॥

स तु तारं विनिर्भर्त्स्य रावणो लोकरावणः।
पुष्पकं तत् समारुह्य प्रययौ दक्षिणार्णवम्॥ **7.34.11** ॥

तत्र हेमगिरिप्रख्यं तरुणार्कनिभाननम्।
रावणो वालिनं दृष्ट्वा सन्ध्योपासनतत्परम्॥ **7.34.12** ॥

पुष्पकादवरुह्याथ रावणोऽञ्जनसन्निभः।
ग्रहीतुं वालिनं तूर्णं निःशब्दपदमव्रजत्॥ **7.34.13** ॥

यदृच्छया तदा दृष्टो वालिनापि स रावणः।
पापाभिप्रायकं दृष्ट्वा चकार न तु सम्भ्रमम्॥ **7.34.14** ॥

शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा।
न चिन्तयति तं वाली रावणं पापनिश्चयम्॥ **7.34.15** ॥

जिघृक्षमाणमायान्तं रावणं पापचेतसम्।
कक्षावलम्बिनं कृत्वा गमिष्ये त्रीन् महार्णवान्॥ **7.34.16** ॥

द्रक्ष्यन्त्यरिं ममाङ्कस्थं स्रंसदूरुकराम्बरम्।
लम्बमानं दशग्रीवं गरुडस्येव पन्नगम्॥ **7.34.17** ॥

इत्येवं मतिमास्थाय वाली मौनमुपास्थितः।
जपन् वै नैगमान् मन्त्रांस्तस्थौ पर्वतराडिव॥ **7.34.18** ॥

तावन्योन्यं जिघृक्षन्तौ हरिराक्षसपार्थिवौ।
प्रयत्नवन्तौ तत् कर्म ईहतुर्बलदर्पितौ॥ **7.34.19**॥

हस्तग्राहं तु तं मत्वा पादशब्देन रावणम्।
पराङ्मुखोऽपि जग्राह वाली सर्पमिवाण्डजः॥ **7.34.20**॥

ग्रहीतुकामं तं गृह्य रक्षसामीश्वरं हरिः।
खमुत्पपात वेगेन कृत्वा कक्षावलम्बिनम्॥ **7.34.21**॥

तं च पीडयमानं तु वितुदन्तं नखैर्मुहुः।
जहार रावणं वाली पवनस्तोयदं यथा॥ **7.34.22**॥

अथ ते राक्षसामात्या ह्रियमाणे दशानने।
मुमोक्षयिषवो वालिं रवमाणा अभिद्रुताः॥ **7.34.23**॥

अन्वीयमानस्तैर्वाली भ्राजतेऽम्बरमध्यगः।
अन्वीयमानो मेघौघैरम्बरस्थ इवांशुमान्॥ **7.34.24**॥

तेऽशक्नुवन्तः सम्प्राप्तुं वालिनं राक्षसोत्तमाः।
तस्य बाहूरुवेगेन परिश्रान्ता व्यवस्थिताः॥ **7.34.25**॥

वालिमार्गादपाक्रामन् पर्वतेन्द्रापि गच्छतः।
किं पुनर्जीवनप्रेप्सुर्बिभ्रद् वै मांसशोणितम्॥ **7.34.26**॥

अपक्षिगणसम्पातान् वानरेन्द्रो महाजवः।
क्रमशः सागरान् सर्वान् सन्ध्याकालमवन्दत॥ **7.34.27**॥

सम्पूज्यमानो यातस्तु खचरैः खचरोत्तमः।
पश्चिमं सागरं वाली आजगाम सरावणः॥ **7.34.28**॥

तस्मिन् सन्ध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः।
उत्तरं सागरं प्रायाद् वहमानो दशाननम्॥ **7.34.29**॥

बहुयोजनसाहस्रं वहमानो महाहरिः।
वायुवच्च मनोवच्च जगाम सह शत्रुणा॥ **7.34.30**॥

उत्तरे सागरे सन्ध्यामुपासित्वा दशाननम्।
वहमानोऽगमद् वाली पूर्वं वै स महोदधिम्॥ **7.34.31**॥

तत्रापि सन्ध्यामन्वास्य वासविः स हरीश्वरः।
किष्किन्धामभितो गृह्य रावणं पुनरागमत्॥ **7.34.32**॥

चतुर्ष्वपि समुद्रेषु सन्ध्यामन्वास्य वानरः।
रावणोद्वहनश्रान्तः किष्किन्धोपवनेऽपतत्॥ **7.34.33**॥

रावणं तु मुमोचाथ स्वकक्षात् कपिसत्तमः।
कुतस्त्वमिति चोवाच प्रहसन् रावणं मुहुः॥ **7.34.34**॥

विस्मयं तु महद् गत्वा श्रमलोलनिरीक्षणः।
राक्षसेन्द्रो हरीन्द्रं तमिदं वचनमब्रवीत्॥ **7.34.35**॥

वानरेन्द्र महेन्द्राभ राक्षसेन्द्रोऽस्मि रावणः।
युद्धेप्सुरिह सम्प्राप्तः स चाद्यासादितस्त्वया॥ **7.34.36**॥

अहो बलमहो वीर्यमहो गाम्भीर्यमेव च।
येनाहं पशुवद् गृह्य भ्रामितश्चतुरोऽर्णवान्॥ **7.34.37**॥

एवमश्रान्तवद् वीर शीघ्रमेव च वानर।
मां चैवोद्वहमानस्तु कोऽन्यो वीरो भविष्यति॥ **7.34.38**॥

त्रयाणामेव भूतानां गतिरेषा प्लवङ्गम।
मनोऽनिलसुपर्णानां तव चात्र न संशयः॥ **7.34.39**॥

सोऽहं दृष्टबलस्तुभ्यमिच्छामि हरिपुङ्गव।
त्वया सह चिरं सख्यं सुस्निग्धं पावकाग्रतः॥ **7.34.40**॥

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम्।
सर्वमेवाविभक्तं नौ भविष्यति हरीश्वर॥ **7.34.41**॥

ततः प्रज्वालयित्वाग्निं तावुभौ हरिराक्षसौ।
भ्रातृत्वमुपसम्पन्नौ परिष्वज्य परस्परम्॥ **7.34.42**॥

अन्योन्यं लम्बितकरौ ततस्तौ हरिराक्षसौ।
किष्किन्धां विशतुर्हृष्टौ सिंहौ गिरिगुहामिव॥ **7.34.43**॥

स तत्र मासमुषितः सुग्रीव इव रावणः।
अमात्यैरागतैर्नीतस्त्रैलोक्योत्सादनार्थिभिः॥ **7.34.44**॥

एवमेतत् पुरा वृत्तं वालिना रावणः प्रभो।
धर्षितश्च वृतश्चापि भ्राता पावकसन्निधौ॥ **7.34.45**॥

बलमप्रतिमं राम वालिनोऽभवदुत्तमम्।
सोऽपि त्वया विनिर्दग्धः शलभो वह्निना यथा॥ **7.34.46**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुस्त्रिंशः सर्गः॥